अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ..........................

**Paper Code**
**MAS-404**

# पतञ्जलिविश्वविद्यालयः

## परीक्षा – मईमासः – 2019

## एम.ए. संस्कृतम्, (सत्रम् : चतुर्थम्)

## महाकाव्यम्

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

### खण्डः क
### (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. तृतीयपरिच्छेदे श्रीभक्तफूलसिंहस्य कीदृशं वैशिष्ट्यं वर्णितम्?
2. सौन्दरनन्दे त्रयोदशसर्गे किं वर्णितमिति लेखनीयम्।
3. दयानन्ददिग्विजयस्य सप्तमसर्गमधिकृत्य निबन्धमेकं लिखन्तु।
4. दयानन्ददिग्विजये टंकारानगर्याः स्वरूपं कीदृशं वर्णितमस्ति?
5. श्रीभक्तफूलसिंहस्य त्यागसंघर्षयोः विस्तरेण वर्णनं करणीयम्।

### खण्डः ख
### (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

**(क) निम्नलिखितेषु श्लोकेषु त्रयाणामेवससन्दर्भं व्याख्या करणीया –** **(3×5=15)**

1. दुर्लभं दैवतो लब्ध्वा दीनो द्रव्यनिधिं यथा।
   आननन्द तथा पुत्रं नररत्नं द्विजेश्वरः।।
2. युक्ताहारविहारस्य प्रसन्ना पूतमानसा।
   गर्भगतमहात्मानं पालयामास यत्नतः।।
3. संसारवासनाशून्यः संन्यासी मुक्त एव सः।
   केवलं वेषनामादेरियेष परिवर्त्तनम्।।
4. श्लक्ष्णेन वचसा कांश्चित् कांश्चित्परुषया गिरा।
   कांश्चिदाभ्यामुपायाभ्यां स विनिन्ये विनायकः।।
5. नेन्द्रियं विषये तावत् प्रवृत्तमपि सज्जत।
   यावन्न मनसस्तत्र परिकल्पः प्रवर्तते।।

**(ख) गद्यस्यैकस्य सप्रसंगं व्याख्या क्रियताम् –** (1×5=05)

(अ) यास्मिन्न शरण्येऽरण्ये प्रविशतोऽपि पुंसो भयं जायतेस्म तदेवेदानीं जंगलं मंगलधाम ग्रामतुल्यं प्रतीयते स्म। कुतो न प्रतीयते, वेदे खलु–आदिष्टमस्ति – "उपगह्वरे गिरीणां संगमे च नदीनाम् धिया विप्रोऽजायत" इति। यस्यायं भावः – वनेषु गिरिकन्दरासु नदीनां संगमस्थलेषु च धार्मिकास्तपस्विनो विद्वांसः समुद्भवन्तीति। श्रीमान् स्वामी श्रद्धानन्दो महाभागस्तस्य वनस्य भूमिमुपस्थितस्य जनसमुदायस्योत्साहं चावेक्ष्य बहुप्रभावितः प्रमुदितश्चाभवत्।।

(ब) दृश्यतां पाठकैः – पुरा कृतानामघानां मर्षणस्य कीदृशोऽद्भुत आदर्शः प्रादर्शि तत्र भवता। एवं पापार्जितधनस्य परित्यागेनाहंसां निबर्हणं श्रेयसां चोपबर्हणं विधाय भवान् परमां शान्तिमलभत। युक्तमेवाह भगवान् वेदपुरुषः – "मनुष्यकृतस्यैनसोऽवयजनमसि" इति। मनुष्यान् प्रति कृतानामेनसां विनाशयिता भगवान् परमेष्ठी प्रभुरेव सर्वैः समाश्रयणीयः। तदनुकम्पासम्पादनादेव सर्वपापानां निवृत्तिर्भवतीति।

## खण्डः ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे पञ्चातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय एकाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति। (05×01=05)

**निम्नोक्तानां प्रश्नानां संक्षेपेणोत्तराणि दातव्यानि –**

1. बालकानां कृते श्रीभक्तफूलसिंहेन कुत्र गुरुकुलस्य स्थापना कृता ?
2. सौन्दरनन्दं महाकाव्यं केन लिखितम् ?
3. सौन्दरनन्दमहाकाव्ये त्रयोदशसर्गस्य किं नामोल्लिखितम् ?
4. महर्षिदयानन्दस्य संन्यासदीक्षायाः वर्णनं कस्मिन् सर्गे दर्शितम् ?
5. दयानन्ददिग्विजयस्य कः लेखकः ?

--------------x--------------